Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 5 | ISSN : 2582-0095

# वर्त्तमानकाले वेदाङ्गानाम् उपादेयता

**नीरज आर्यः**
शोधच्छात्र, संस्कृतविभागः, गुरुकुल कांगड़ी (समविश्वविद्यालयः) हरिद्वारः।

**Article Info**
Volume 5, Issue 5
Page Number : 37-41
**Publication Issue :**
September-October-2022
**Article History**
Accepted : 03 Sep 2022
Published : 20 Sep 2022

**शोधसारांशः** –वेदाङ्गानां वर्त्तमानकाले महती उपादेयता वर्त्तते । वेदाङ्गेषु सर्वत्र सदाचारः, शुचिता, धर्यम्, क्षमाशीलता, इन्द्रियनिग्रहः, सत्यवादिता, परोपकारभावना, नैतिकता,अभिवादनशीलता, मांतृपितृगुरूशुश्रषा, अतिथिसत्कारः, ब्रह्मचर्यपालनम् , वेदाध्ययनम्, इत्यादिभिः शिक्षा वर्त्तमानकालेप्रासङ्गिकम्वर्त्तते। अत्र अस्मिन् शोधपत्रे साररूपेण वेदाङ्गानां विवेचनं सामान्यरूपेण प्रस्तुतम्।
**मुख्यपदानि**–वेदाङ्गः, वर्तमानकालः, सदाचारः, इन्द्रियनिग्रहः, सत्यवादिता, क्षमाशीलता, सुचिता।

संस्कृतवाङ्मये वेदानां स्थानं सर्वोपरि वर्त्तते। वेदज्ञानं प्रदाने तु परमात्मा एव सक्षमः। वदेनाञ्च संरचना पदपदार्थस्य प्रत्यक्षीकृत ज्ञान प्रदात्रा परमात्मामना बुद्धया कृता। इत्थं पर्णूवेदज्ञानं संज्ञानाय कोऽप्यन्यग्रन्थस्य साधनस्य च न आवश्यकता। पुनः यदा वेद शब्देन साकं अङ्ग शब्दकरणे छन्दादीनि षट् शास्त्राणि ज्ञायन्ते।

**वेदाङ्ग व्युत्पत्ति** : – अङयन्ते ज्ञायन्ते एभिः अमीभिः वा इति अङ्गानि–येन चिह्न्यन्ते, ज्ञायन्त, तानि अङ्गानि कथ्यन्ते।

**वेदानां अङ्गानि वेदाङ्गानि।**

इमानि षडङ्गानि तस्मिन् समये प्रादुर्भूतानि, यदा श्रुतिपरम्परया वेदज्ञानं अवबोधने जनाः समाजश्च असमर्थाः। यावत् वेदज्ञानं पठन–पाठन श्रवणपरम्परया अभूत्, तावत् न पुस्तकाकारवेदानाम् आवश्यकता, न च तान्यङ्गानाम्।

श्रवणपरम्परायां व्याघाते सति महनीयवेदज्ञानरक्षार्थं ऋषिभिः वेदानपि पुस्तकाकृतिः प्रदत्ता, शिक्षादिवेदाङ्गन्यपि ग्रथितानि।

तथाहि यास्कमहर्षिणा सुस्पष्टम् –

> **साक्षात्कृतधर्माण ऋषयो वभूबुस्तेऽवरेभ्योऽ साक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्बग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च।।**[1]

अर्थात् शिक्षा, व्याकरणम्, छन्दः, निरूक्तम्, ज्योतिषम्, कल्पश्चेति इमानि षङ्गानि वेदमनीषिभिः कथितानि। षडङ्गानां महत्वं ध्यानावस्थित्यैव महर्षि पतंजलिनोक्तम् –

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।** [2]

अर्थात् ब्राह्मणकर्त्तव्यं यत सः प्रतिफलाकाङ्क्षां विनैव सषडङ्गानां वेदाध्ययनं अधीयीत।

षण्णामेतेषां महत्वं निरीक्ष्यैव पाणिनीयशिक्षायां प्रतिपाद्यते यत् –

**छन्दः पादौ तु वदेस्य हस्तो कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतमत्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[3]

अर्थात् छन्दशास्त्रं वेदानां पादस्थानीयः। यथा पुरूषः पादाभ्यां गतिस्थिति च प्राप्नोति तथा वेदोऽपि छन्दसि प्रतिष्ठितः।

कल्पशास्त्रं वेदानां हस्तसमयुपयोगी वर्त्तते। ज्योतिषशास्त्रं नेत्रसमं विद्यते। निरूक्तशास्त्रं श्रोतसमं विद्यते। शिक्षाशास्त्रं नासिकासमं, व्याकरणशास्त्रञ्च वेदानां मुखसमं अवबुध्यते। अर्थात् शिक्षादीनि शास्त्राणि वदोर्थज्ञाने उपयोगे च शरीरस्य हस्तपादाद्यङ्गवत् साक्षादुपकारं। साहायकञ्च वर्त्तते। अतः साङ्गं वेदाध्ययने एव मनुष्यः ब्रह्मलोके महीयते। वेदाङ्गानामेतेषां विवरणं वदोर्थबोधोपयोगिता च समासतोऽत्र प्रस्तूयते –

1. **शिक्षा**–स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा। अर्थात् यस्मिन् शास्त्रे स्वरर्णाद्युच्चारणपद्धतिः सा शिक्षा कथ्यते। शिक्षाग्रन्थाः वर्णोच्चारणविधिं विशेषतो वर्णयन्ति। कथं वर्णः उच्चारणीयाः किं तेषां स्थानम्, कश्च तत्र यत्नः, कण्ठताल्वादीनामुच्चारणे किं महत्वम्, कति वर्णा, कथं कायमारूतो वर्णत्वने विपरिणमते, कति स्थानानि, कति स्वराः, कथं च ते प्रयोज्य जनीयाः इत्यादयो विषयाः शिक्षाग्रन्थेषु विवेच्यन्ते।

सायणेन ऋग्वदोदिभाष्यभूमिकायां शिक्षालक्षणम् उच्यते यत् **स्वरवर्णाद्युच्चारण प्रकारो यत्र शिक्ष्यते सा शिक्षा।**[4] तैत्तिरीयोपनिषदि शिक्षायाः स्वरूपं निरूप्यते यद्–

**वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानः। इत्युक्तः शिक्षाध्यायः।**[5]

एतच्च पाणिनिना मुनिनैव विव्रियतेवर्णः अकारादिः, स्वराः, उदात्तानुदात्तस्वरिताः, मात्राः – ह्रस्वदीर्घप्लुताः, बलम् – स्थानप्रत्नौ, साम – साम्येन विधिना माधुर्यादिगुणसमन्वित वर्णोच्चारणम्, सन्तानः – सहिपाठम् अनुसृत्य सन्धिनियमानुकूलं पद प्रयोगः। उच्यते च पाणिनीयशिक्षायाम् – **माधुर्यमक्षरव्यक्तिः पदच्छदेस्तु सुस्वरः। धैर्यं लयसमर्थं च षडेते पाठका गुणाः।।**[6]

साम्प्रतं उपलभ्यमानेषु ३२ शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रमुखा। अन्ये च विशिष्टाः शिक्षाग्रन्थाः सन्ति – **याज्ञवल्क्यशिक्षा, व्यासशिक्षा, नारदीयशिक्षा, माण्डुकीशिक्षा चेति।**

वर्णोच्चारणादिविधि–ज्ञानम् अन्तरेण न शक्यो वेदानां विशुद्धः पाठोऽर्थाबगमञ्चेति। 'शिक्षा घ्राणं तु वेदस्य'व्याहरता पाणिनिना शिक्षाग्रन्थानां नासिका स्थानीयत्वं स्वीक्रियते । तात्पर्यमेतत् वेदानां संरक्षणाय ऋषिभिः वेदाङ्गानि ग्रथितानि। सहैव वेदानामकारादिवर्णाः, उदात्तादिस्वराः, ह्रस्वादिमात्राः, कण्ठमूर्धन्यादिस्थानीयवर्णाः, स्पृष्टाद्याभ्यत्तरप्रयत्नाः,
घोषादिबाह्यप्रयत्नाः ग्रस्तादिदोषाः, माधुर्यादिगुणाश्च अवबोधनाय शिक्षाशास्त्रं निर्मितम्।

2. **कल्पः –** कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्।अर्थात् वदेषु विहितकर्मणां क्रमशः व्यवस्थितकल्पनाकारकं शास्त्रं कल्पः कथ्यते। वैदिककर्मणां पौर्वापर्यं मन्त्रविनियोगादिश्च कल्पशास्त्राध्ययनं बिना न भवितुमर्हति अतः कल्पोऽपि वेदानामवगमने सहायकभूतात् वेदाङ्गः। कल्पशास्त्रं सूत्रेषू निबद्धः सत्रूार्थः यः –

**स्वाल्पयक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।**
**अस्तोभमनवधञ्च सूत्रं सूत्रविदो बिदुः।।**

अर्थात् यत् अल्पाक्षरेषु शब्देषु कथितं, असन्देहं सारगर्भितं, षह्षर्थान् प्रकटपितृ, सरलं दोषरहितञ्च स्यात् इत्थम्भूतः नियमः, सिद्धांत्तश्च सूत्रं कथ्यते। इमानि कल्पसत्राूणि आरण्यकैः ब्राह्मणग्रन्थैः निरन्तरं सम्बद्धानि।

कल्पसत्रेषु विविधाध्वराणां संस्कारादीनाञ्च वर्णनं प्राप्तये। मन्त्राणां विविधाकर्मसु विनियोगश्च तत्र प्रातिपाद्यते। कल्पसत्राणि चतुरप्रकारकैः विभज्यन्ते –

1. श्रौतसूत्रम् 2. गृह्यसूत्रम् 3. धर्मसत्रम् 4. शुल्वसूत्रम् च।

**श्रौतसत्रम् –** श्रुतिप्रतिपादितदर्शपौर्णमासादियज्ञानां विधान बोधकानि श्रौतसूत्राणि। अर्थात् श्रौतसूत्रेषु श्रुतिप्रतिपादादितानां। सप्तहविर्यज्ञानां सप्तसोमयज्ञानां एवं चतुर्दशयज्ञानां विधिविनियोगादिकं च प्रतिपाद्यते।

ब्राह्मणग्रन्थेषु वर्णितानां श्रौताग्नियज्ञानां क्रमबद्धवर्णनं श्रौतसूत्रेष्वेव वर्त्तते। श्रौतसूत्राणि इमानि कमप्येकं वेदमाश्रित्य वर्त्तते। तत्र प्रमुखानि सन्ति –

**आश्वलायनश्रौतसत्रम्, शांखायनश्रौतसूत्रम्, बौधायनश्रौतसत्रम्, आपस्तम्बश्रौतसूत्रम्, मानवश्रौतसत्रम्, कात्यायनश्रौतसत्रम् इत्यादीनि।**

**गृह्यसत्रम् –** गृह्यसूत्रेषु षोडशसंस्काराणां पञ्चमहायज्ञानां सप्रथाकयज्ञानाम् अन्येषाञ्च गृह्यकर्मणा सविशेषं वर्णनम् आध्यते। तत्रैच त्रैवर्णिकैः ब्राह्मण क्षत्रियवैश्यैः आवश्यकतानुष्ठानां यागानां वा विस्तृतवर्णनमुपलभ्यते ।

गृह्यसूत्राणि कमप्येकं वदेमाश्रित्य वर्तन्ते। तत्र प्रमुखाणि सन्ति – आश्वलायन, पारस्करश्रौतसूत्रम्, शांखायनश्रौतसत्रम्, बौधायनश्रौतसूत्रम् इत्यादीनि।

महर्षि दयानन्द महाभागैः गृह्यकर्मभ्यः 'संस्कारविधिः' पुस्तकं लिखितं। अस्य प्रमुखवैशिष्ट्यं यत्र अस्मिन् कर्मकाण्डः मूलवेदसंहितानामाधारे अस्थाप्यत, तैः सस्कारेषु गृह्यसत्रैः सह चतुर्वेदानां मन्त्राः अपि उद्धृताः।

**धर्मसूत्रम् –**धर्मसूत्रं कल्पशास्त्रस्य गौरवमयः विभागः। धर्मसत्रेषु मानवानां कर्त्तव्यम् नीतिधर्मा रीतयः चतुर्वर्णाश्रमाणां कर्त्तव्यादिकं अन्यच्च सामाजिकनियमादिकं वर्ण्यते। तत्र प्रमुखाः ग्रन्थाः सन्ति **–वसिष्ठश्रौतसूत्रम् , हिरणकेशीश्रौतसूत्रम् गौममश्रौमसत्रम्, आपस्तम्बश्रौतसत्रम् इत्यादयः।**

**शुल्वसत्रम् –** मापक्रियायाः सामान्य नाम शुल्वमस्ति। अतः मापविषयकं वेदी निर्माण प्रकारबोधकं शुल्वसूत्रं इति बोधव्यः। भारतवर्षे रेखागणितस्य पुरातने इतिहास्य ज्ञानाय शुल्वसूत्राणां विषयः। यजुर्वेदस्य एव अनेकानां शाखानां शुल्वसूत्राणि समुपलभ्यन्ते। अर्थात् शुल्वसत्राणि तु केवल यजुर्वेदविषयकानि एव सन्ति सर्वेषु शुल्वसत्रेषु वेदी निर्माण विधिः वैशिष्ट्येन विस्तरेण च वर्णितः अस्ति। तत्र मैत्रायणी, बाराह, वाधूल, आपस्तम्ब, बौधायन, कात्यायन, मानव इत्यादीनि प्रधानानि शुल्वसत्राणि सन्ति। स्पष्टमेतत् वेदेषु विस्तीर्णं कर्मकाण्डं सत्रबद्धं कर्तुमेव कल्पस्य आविर्भावः। अर्थात् वदेविहितानां कर्मणां व्यवस्थापकं शास्त्रं कल्प इत्यभिधीयते।

**3. व्याकरणम् :** – व्याकरणे प्रकृतिप्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धिनियमाः, शब्दरूपधातुरूपादिनिर्माणनियमाः, प्रकृतेः, प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधा विषया विविच्यन्ते। वेदेषु प्रकृतिप्रत्ययविचारस्य स्वरूपस्य च महन्महत्वमिति तत्र व्याकरणमेव साहाय्यम् अनुतिष्ठतीति षडङ्गेषु व्याकरणमेव प्रधानम्।

**व्याक्रियन्ते विविच्यन्ते शब्दाः अनेनेति व्याकरणम् इति** व्युत्पत्यानुसारेण सस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्धयाशुद्धयोः विचारः व्याकरणेनैव क्रियते। एतदर्थमेव सस्कृतव्याकरणस्य जनिरभूत्। संस्कृतव्याकरणावबोधाय महर्षेः पाणिनेः अष्टाध्यायी प्राधान्यं लभते। लौकिकसंस्कृतेन सहैव वैदिकसंस्कृतस्यापि व्याकरणं तत्र प्रस्तूयते।

व्याकरणे हि प्रकृतिप्रत्ययादीनां सक्ष्मातिसूक्ष्मं विवचेनं प्रस्तूयते। विवेचनमेव व्याकरणस्य मुख्यार्थः। प्रकृतिप्रत्यययोः, ध्वनिस्फोटयोः, शब्दापशब्दयोः, आकृतिद्रव्ययोः, शब्दनित्यतानित्यतयोः, पदवाक्ययोः, पदपदार्थयनेः, वाक्यवाक्यार्थयोः, विवेचनं विश्लेषणं च

व्याकरणस्य प्रयोजकत्वेनास्थीयते।

भगवता पतञ्जलिना व्याकरणस्य पञ्च प्रयोजनानि उपस्थाप्यन्ते। तद्यथा –**रक्षोहागमलघ्वसदेंहाः प्रयोजनम्।**[7] वेदानां रक्षार्थम्, ऊहार्थम् अर्थात् यथास्थानं उचितशब्दप्रयोगार्थम्, शास्त्राज्ञापालानार्थम्, लघ्वर्थम्, असन्हेदार्थं च व्यारकणध्ययनम् अनिवार्यम्।

शास्त्रज्ञापनुवता पतञ्जलिना प्रोच्यते –

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदाऽध्येयो ज्ञेयश्च। प्रधानं च षडङ्गेषु व्याकरणम्।।** [8]

एवं पतञ्लिनां व्याकारणाध्ययनस्य षडङ्गेषु व्याकरणस्य मुख्यत्वञ्च प्रतिपाद्यते। व्याकरणं वदोङ्गेषु मुख्यत्वेन उररीक्रियते। ॉब्दाधीनं जगत्, शब्दश्च मुखेनोच्चारणीयः, अतः तत्साधनत्वेन व्याकरणमपि शब्दब्रह्मणो मुखरूपमस्ति। यथा मुखं सौन्दर्यार्थकं तथैव व्याकरणमपि भाषायाः साधुत्वप्रतिपादेन सौन्दर्याधायकम्, मुखं भाषणसाधन तथैव

व्याकरणमपि परिष्कृतशब्दप्रयोगसाधनम्। व्याकरणमेव शब्दप्रकाशनेन

स्वमनोगतभावाविभविकम् अन्तर्निहितविचारप्रसारकं ज्ञानज्योतिश्चास्ति। यथा शरीरावयवेषु मुखस्योष्कृष्टत्वं न केनाप्याक्षिप्यते, तथैव भाषातत्वविवचेनेन शब्दज्ञानमूलकत्वेन शब्दशास्त्रावगाहनेन वाक्यत्तत्वविवचेनेन शब्दब्रह्मरुवरूपप्रकाशनेन व्याकरणस्य शास्त्रेषु सर्वोत्कृष्टं न केनापि व्याक्षेप्तुं पार्यते।

**4. निरूक्तम् :–** यत्र पदस्य सम्भाविता अवयवार्था निःशेषेणोच्यन्ते तन्निरूक्तम् अर्थात् यस्मिन् शास्त्रों पदानां सम्भावितावयवार्थाः पर्णूतया कथ्यन्ते तत् निरूक्तं निर्वचनविद्या वा कथ्यते। वेदस्य व्यापकार्थं ज्ञापनाय निरूक्तशास्त्रं प्राणीयत। वेदांगेषु निरूक्तं वेदार्थदृष्टया वैशिष्टयं विद्यते। तत् श्रोत्ररूपं यथा श्रात्रेभावे वाचा लोकव्यवहाराः तु भविष्यन्ति परं ते सीमिता एव तथैव निरूक्तं विना व्याकरणेन पदपदार्थज्ञाने सति वेदानां व्यापकार्थं न ज्ञातुं सक्षमः। यास्कमहर्षिणा निरूक्तभूमिकायां निरूक्तशास्त्रस्य प्रयोजनानि दर्शयता अर्थं पर्यज्ञायत –**अथार्यापीमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते, अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोऽदेशः, ततिदं विद्यास्थानं, व्याकरणस्य कात्स्र्न्यं स्वार्थसाधकं च।।**[9]

अर्थात् निरूक्तं विना मन्त्रार्थानां परिज्ञानं न भवितुमर्हति। यः अर्थं न जानाति, व्याकरणस्य परूकं एतन्निरूक्तशास्त्रं। निरूक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते। विषयेऽस्मिन् यास्कप्रणीतं निरूक्तमेव प्रमुखो ग्रन्थः। अत्र मन्त्राणां निर्वचनमूलाया व्याख्यायाः प्रथमः प्रयासः समासाद्यते। वैदिकशब्दानां सग्रंहात्मको ग्रन्थो निघण्टुरिति कथ्यते। तस्मै व्याख्यानभूतं निरूक्तमेतत्।

**5. छन्दः –** वेदस्य पञ्चमाङ्ग छन्दः। 'छन्दः पादौ तु वेदस्य' इत्यनुसारणे छन्दोविद्या वेदानां पादसमं उपकारकं सहायकं वर्त्तते। यथा पाद विना मनुष्यः न स्थातुं शक्यते, न चलितुं शक्यते तथैव छन्दः ज्ञानं विना मनुष्यः वेदज्ञाने पङ्गुवत विद्यते।

वेदेषु मन्त्राः प्रायः छन्दोबद्धा एव। अतो वृत्तज्ञानाय छन्दः शास्त्रं अनिवार्यम्। छन्दः शास्त्रविषयको मुख्यो ग्रन्थः पिंगलप्रणीतं छन्दः सूत्रमेवोपलभ्यते। प्रातिशाख्यग्रन्थेष्वपि वृत्तिविचारः प्राप्यते। एभ्य एव लौकिकछन्दोविषयाणां ग्रन्थानां विकासः समजनि।

**छन्दसः अर्थ : –**

**छन्दांसि छादनात्।**[10] अर्थात् छन्दासि छान्दोग्योपनिषदि लिखितम्–

**देवा वै मृत्योर्विभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिश्च्छादयन्, पदेभिश्चछादयॅस्त्रच्छन्दसां छन्दस्त्वम्।।**[11]

वेदाः छन्दोबद्धाः अतः कालान्तरे उपचारवशात् वेदाय छन्दः शब्दस्य अप्रधानं अप्रयुज्यत। प्रतिवैदिकधर्मणिः वेदमन्त्राणां सम्यगुच्चारणपाठाय, वेदमन्त्राणां गूढत्वमवबोधनाय तथा छन्दसामनुसारेण वैदिकशास्त्रोक्त कर्मकाण्डानां उचितनुष्ठानार्थं छन्दः शास्त्रस्य अवश्येव अधीयीरन्।

**6. ज्योतिषम् :**

द्योतते प्रकाशत तद ज्योतिः।

ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषम्।

एतदनुसारं ग्रहोपग्रहनक्षत्रादीनां स्थितिः, गत्यादीनां विचारकाणि ॉास्त्राणि 'ज्योतिषम्' कथ्यन्ते।

**ज्योतिषशास्त्राणां महत्व प्रयोजनञ्च –** अद्यत्वे ज्योतिषशब्दं भविष्यकाले भावीवार्तायै रूढः सजांतः। ज्योतिषशब्दं श्रवणेऽपि भविष्यं कल्प्यते। हस्तरेखा, अंगलक्षण, जन्मपत्रिका, मुहूर्त्त, वार, तिथि, ग्रह, नक्षत्र, राशि, स्वप्नादीनां साहाय्यने भविष्यं ज्ञातुं शक्यते।

शुभं मुहूर्त्तम् आश्रित्यै विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्त्तकलनाय ज्योतिषस्योदयोऽभूत्। अत्र सर्यूचन्द्रमसोर्ग्रहाणां नक्षत्राणां च गतिनिरीक्ष्यते, परीक्ष्यते, विविच्यते च।

यदि ज्योतिषशास्त्रस्य एतदेव प्रयोजनं विद्यते, तर्हि इदं शास्त्रं ज्योतिषं एवं वेदाङ्ग कथनं निरर्थकः विद्यते। वेदविहितयज्ञादिकर्माणि कस्मिन् काले करणीयम्, एतद् ज्ञानाय एव ज्योतिषशास्त्रं निर्मितम्। वेदार्थावबोधाय तत्स्वराद्यवगमाय तद्विनियोगज्ञानाय चासीद् महत्यावश्यकता केषांचित सहायकग्रन्थानाम्। एतदभावपूर्तये एव जनिरभूद् वेदाङ्गानाम्।

## सन्दर्भसूची


1. निरुक्त पृष्ट सं.–9
2. महाभाष्य (पस्पशाह्निक ) पृ0 25
3. पाणिनीयशिक्षा श्लोक सं.41.42
4. ऋग्वेदादिभाष्यभूमिका पृष्ट सं.–39
5. तैत्तिरीयोपनिषद अथर्ववेद 2७9
6. वर्णोच्चारण शिक्षा पृ0 8
7. महाभाष्य (पस्पशाह्निक ) पृ0 9
8. महाभाष्य (पस्पशाह्निक ) मुण्डकोपनिषद .1.1.5
9. निरुक्त पृष्ट 1/5
10. निरुक्त पृष्ट 7/2
11. छान्दोपनिषद 1/4/2